No. ४३४३

Title शास्त्र दीपिका १ अध्यायाद् द्वितीयाध्यायान्त

Author पार्थसारथि मिश्र

Extent ११२-१/२ Age १८०१ पूर्व

Subject पू. मीमांसा शास्त्रं

घू॰ सूत्रदीपिका तृतीयाध्यायादिः षष्ठाध्यायांता

५२५२

स्वस्ति॥ अथातः शेषलक्षणम्। एवं सिद्धे भेदे शेषशेषित्वमिदानीं चिंत्यते। भिन्नानां हि तत्संभवति नाभिन्नानामि-
ति भेदलक्षणस्य हेतुत्वं यद्यपि ब्रीहीनवहंति सोमेन यजेतेत्यादिषु द्रव्यकर्म्मणोः शेषशेषिता न कर्मभेदापेक्षा तथा-
पि कर्म्मणामपि प्रयाजादीनां यागादीनां शेषशेषित्वमिहैव वक्तव्यमिति तत्सिद्ध्यर्थं भेदलक्षणापेक्षणं ननु चावघात-
स्यापि ब्रीहिस्त्रिर्यजेतेति शास्त्रांतरार्थेन शेषशेषित्वं चिंतानं ब्रीहिपदार्थमात्रेण शास्त्रभेदलक्षणस्वरूपं दृ-
मिति संभवति हेतुत्वं किं ब्रीहीनवहंति ब्रीहिस्त्रिर्यजेतेत्यनयोः शास्त्रयोर्भेदोस्ति उमिति चेत्॥ केन रूपेणानव- न॰ ५
न्निरपेक्षसाध्यभेदात्रास्ति नाप्यनुबंधभेदो येन शास्त्रभेदस्यात् तस्माद्वाक्यांतरत्वमेव न शास्त्रांतरत्वे
न वाक्यभेदलक्षणापेक्षा पूर्वोक्तं सोमेन यजेत अरुणया क्रीणातीत्यादिषु वाक्यांतरत्वमपि नास्ति द्रव्यदेवशास्त्र-
भेदात् ननु तत्रापि ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रांतरविहिताधिकारसंबंधस्यैव यागस्य शेषः सोमः
न सोमज्योतिष्टोमतायां रनुबंधसाध्यभेदोस्तित्व नयत्रापि सोमस्यैव विषयत्वेनानुबंधभेदाभावात् निर-
पेक्षसाध्यभेदाभावाच्च न उद्भिदा यजेत पशुकामः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादौ स्ववाक्यत एव फले
द्रव्यदेवता यागस्य [illegible] सावयागे शेषत्वमिति द्रव्यांतरत्वमपि नास्तीति चेत् अस्ति [illegible] नैवपदं प्रत्ययार्थं [illegible] नामपदं वा
याग

प्रतिप्रकृत्यर्थं स्ययागस्य चोत्पत्त्यात् ॥ पदभेदोपि नास्ति नतरां वाक्यभेदो नतमां च शास्त्रभेदः। तस्मात्क
र्मणामेव शेषशेषित्वचिंतार्थं भेदलक्षणापेक्षणं इतीपि न शास्त्रभेदापेक्षा तद् तावत्प्रघाताद्भेयादीनां
शेषशेषित्वात् तस्मात् कर्मभेदानुष्ठानमेवैतन्न्यायात् कर्मलक्षणं वृत्तमिति तिनत्तद्वारा शास्त्रभेदानुष्ठानं
तस्य हानुपयोगात्। अतएव कर्मभेद एव षष्ठीध्यायार्थो न शास्त्रभेदः। सोऽत्रैवावात, अद्वैन षष्ठे वृत्तस्य हेतु
त्वमुच्यते हेतुत्वेव कर्मभेदस्यैव सम्भवतीति न शास्त्रभेदस्योक्तं। अतः सत्रेणाप्यविपरीते शास्त्रभेदस्याध्या
यार्थत्वमयुक्तं यौनु वैधातरे हि बुध्यमानस्तदनुवर्त्तिनि योगीतरमेव बुध्यते न मध्ये शास्त्रभेदं। अतो
नासौ वाद्नार्थः। अवादनार्थ ... श्च न विचारमर्हतीति न तद्विचारार्थं भेदलक्षणमित्यास्तीतावत्। अव
कुप्रकारे वेदे शेषलक्षणे एवं दृश्यते कः शेष इति ... तत्स्वरूपं केन हेतुना शेष इति शेषश्चाद् प्रवृत्तिनिमि
त्तं कथं विनियुज्यत इति विनियोगप्रकारः श्रुत्यादीनि विनियोगे शेषस्य शेषिणा सहान्वयबोधने कारणानि
प्रमाणानि तेषां च विरोधे बलाबलं विरोधश्च क्वास्ति क्वनास्तीति तदेतत्सर्वमस्मिन्नेवाध्याये शेषलक्षणे व
क्तव्यम् इति मत्वोक्तं तदनेन सूत्रेणात्र बुद्धिसमाधिस्याद् वक्ष्यमाणार्थप्रदर्शनमात्रं कृतं नात्र पूर्वपक्षे

ण॥ प्रयोजनं॥ शेषः परार्थत्वात्॥ ॥नन्वशेषलक्षणं वक्तव्यमिति तदिदमुच्यते प्रथमं तावदनेन सूत्रेण शेष
स्वरूपं हेतुश्च श्रुत्यर्थाभ्यामुच्यते तत्र सूत्रे श्रुत्या हेतुरुच्यते परार्थत्वाच्छेष इति स्वरूपं त्वर्थाद्यदा हि प उँ
रार्थत्वे शेषप्रवृत्तौ हेतुस्तदा परार्थ एव शेष इति सिद्धं भवति भाष्ये तु यः परार्थस्तस्य शेषत्वम
इति स्वरूपं श्रुत्युक्तमर्थाद्धेतुरिति द्रष्टव्यं अत्र वादिना तावदिदं लक्षणं नासन्निराकरणाय पा
रार्थ्यलक्षणमुच्यते केचिदाहुः किल यन्न विना यन्न भवति बीजादिनैवांकुरादिः स बीजादिस्तस्यां
कुरादेः शेष इत्याहुः तदयुक्तं रूपरसादीनामाग्नेयादीनां च मिथो विनाभावेन शेषत्वापत्तेः प्रयोज
त्वे शेषत्वमित्येतदपि पुरोडाशकपालादिषु प्रयोजकेष्वपि शेषत्वमसत्त्वादव्यापकं अन्ये तु यद्यस्मा
दधिकं विधीयते स तस्य शेष इत्याहुः तदपि मेदसोंऽगप्रधानानां परस्परापेक्षकादन्यविधौ तद्विहि
ते शेषत्वमाहुः तदपि विध्यादिविहितानामपि शाखाच्छेदनादीनामंगत्वदर्शनादयुक्तं तस्मादुपका
रकत्वमेव शेषत्वमित्यन्ये तदप्ययुक्तं प्रधानान्यप्यंगानामनुष्ठानोपयोगं कुर्वन्तीति शेषत्वं गच्छे
युः॥ तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणं परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयते कथं तर्हि श्रुत्या
दिलक्षणी शेषत्वं न हि सोमेन यजेतेति तृतीयया परोद्देशप्रवृत्तत्वं सोमस्योच्यते करणमात्राभिधाना

स्वा ३ अथ तेन श्रुत्यादयः परार्थ्यमभिदधतीति ब्रूमः । किल हि विधिसहिताः परार्थ्यं बोधयन्तीति वि
धिरपि नाभिधानेन परार्थ्यं गमयति किन्तु अर्थापत्त्या स हि चेतनप्रवर्त्तनात्मा न चानुद्दिष्टफले व्या
पारे चेतनः प्रवर्त्तयितुं शक्यत इत्यर्थात् । विधिविषयस्य व्यापारस्य फलोद्देशप्रवर्त्तना गम्यते फलार्थ
श्च व्यापारः फलवद्देवपुरुषस्यातिशयाधायक इति तत्साधनत्वेन श्रुत्यादिभिरवगतानां तत्साधनत्वेन
च विधीयमानानां सोमादीनामपि तदुद्देशप्रवृत्तिः सिद्धा भवति तस्माद्युक्तं श्रुत्यादिगम्यं परा
र्थ्यलक्षणं शेषत्वमिति ॥ ॥ द्रव्यगुणसंस्कारेषु बादरिः ॥ ॥ अत्र शेषत्वस्य विषयकथनेन कः
शेष इत्ययमेवांशः प्रपंच्यते बादरिर्द्रव्यसंस्कारगुणेष्वेवाह शेषतां श्रुत्यादेर्द्दर्शनाच्चैते कर्मणामु
पकारकाः । उपकारकत्वमेव शेषत्वं न परार्थ्यं तस्य बोधकाभावाद्विधिस्तावत् प्रवर्त्तनामात्ररू
पो न तादर्थ्यं गमयति श्रुत्यादयोपि साध्यसाधनतावमात्रपरा न पारार्थ्यं प्रतिपादयन्तीति तस्मादु
पकारकत्वमेव शेषत्वं तच्च दृष्टार्थानां द्रव्यगुणकर्मणां दर्शनादेवावगम्यते प्रोक्षणादीनां तु श्रुत्या २
दिभिः क्रियायाः हि व्रीहीणां प्रोक्षणं प्रति साध्यत्वमभिदधानोपकारमन्तरेण तदनुपपत्ते रुपकारं ग
मयति ननु यागस्य फलशेषत्वे फलस्य वा पुरुषशेषत्वे प्रत्यक्षदर्शनं श्रुत्यादयो वा सन्ति नवेति । जैमिनि

क्ष्यत्वा दिशमेव।

यागः कर्त्तव्य एतावदुच्यते न तु यागेन फलमिति। तदेतत् स्वर्गकामाधिकरणपूर्वपक्षेव द्यामः। स्व
र्गोपि काम्यमानात्मनात्र चोद्यते न त्वात्मार्थः परार्थो वेति न स्यान्न तयोः शेषत्वं अत एव न पुरु
षस्य शेषिता शेषित्वं तु तस्य तस्मात् द्रव्यगुणसंस्कारेष्वेव शेषत्वमिति। तदेतत् स्वर्गकामाधि
करणपूर्वपक्षवादिनो वादरेर्मतं जैमिनिस्तूपकारलक्षणस्य शेषत्वस्यादोषत्वात् पा
रार्थ्यमेव शेषत्वं तच्च विधिगम्यमिति स्वर्गकामाधिकरणसिद्धान्तेव द्यमाणमत्तिप्रेत्य कर्मणा
मपि पारार्थ्यात् शेषत्वमाह। तदेतत्तत्र सिद्धमिति नात्र किं विस्तरेण प्रपञ्चमात्रेण त्विह पू
र्वोक्तशेषत्वविषयस्य क्रियते प्रपञ्चे उक्तं वेन परमतोपन्यासपुरःसरं स्वमतमुपन्यस्तवान्
एवं फलस्यापि पुरुषशेषत्वे कामवशादेवावगम्यते विधिवशाच्च न स्वार्थं किञ्चित् कामयते य
दपि परार्थं कामयते तदपि परेषां स्वार्थमेव अनन्यपरेषां प्रमाणतावात् आत्मार्थते
वगम्यते विधिश्चानात्मार्थे फलसाधने प्रवर्तयितुमशक्नुवन् फलस्यात्मार्थतां गमयति।
लडेतेति चात्मनेपदनिर्देशात् तस्मात् यागफलयोरप्यस्ति शेषता तत्त्व पुरुषस्यापि शेषित्वेन
वै सर्वतः प्रधानत्वात्पुरुषस्य शेषत्वं नास्तीति मन्तव्यं आपाद्य तेन कर्तुर्गुणभूतत्वेनोपादानात्
रच्या

श्रो दैवरी सं मानादि युतुश्रुत्यैव गुणत्वात्॥ ॥तेषामर्थेन संबंधः॥ ॥कः शेषः केन हेतुना शेष इति
द्वयमप्युक्तं इदानीं कथं च विनियुज्यत इत्यपमं शेषा निरूप्यते दर्शपूर्णमासयो निर्वपणप्रोक्ष
णावघातादय औषधधर्मा तत्ववनादय आज्यधर्माः शाखाहरणादयः सान्नाय्यधर्मा सर्वे
षु संशयः किं सर्वे आज्ये औषधे सान्नाय्ये च कर्तव्या उत यथासंयोगं व्यवस्थेति तदर्थं किं प
रमापूर्वं प्रयुक्ता एते किं वा वांतरापूर्वं प्रयुक्ता इति तत्सिद्ध्यर्थमपि किमवांतरापूर्वाणि सं
ति नेति सत्स्वपि वतेषु किं तानि प्रयोजकानि किं वा परमापूर्वं यदापि तानि तदा किं सर्वाणि
सर्वेषां प्रयोजकानि किं वा व्यवस्थेति किं प्राप्तं एकमेव फलापूर्वं फलस्यैकस्यासिद्धये कल्प्यं
नान्यानि धर्मास्तु तादर्थ्यात् सर्वे करणत्वेन अवघातादीनां व्रीह्यादिभिः संबंधो पूर्वसाधन
विशेषकत्वं कृतः न व्रीह्यादिस्वरूपकृतः तथापूर्वं सर्वेषामाग्नेयादीनामेकफलसाधन
त्वादेकमेव कल्प्यते न च हलितदर्थश्चावघातस्तदा येहविषि कर्तव्यस्तदायत्ने वाज्यादीना
मप्यविशिष्टमतो यथा व्रीहिषु श्रुतो वघातो यवेष्वपि भवत्येवमाज्यादिष्वपि भवितुमर्हतीति सं

वी नलक्षणा४

उ वीतरागसर्वज्ञस्तथापि तानि निष्फलत्वाद्यागस्वरूपवदेव न धर्माणि प्रयोजकानि परम्
पूर्वं तु फलवत्त्वात्तस्मादेव प्रयोजकं न चात्र वाडि यमन्यायः तत्र द्रोहलक्षणीयास्वापूर्वं ल
क्षणायोपस्थापयति ज्योतिष्टोमापूर्वं तु लक्षितलक्षणायेत्यस्ति विप्रकर्षः अत्र तु परमापू
र्वमवान्तरापूर्वं वह्नयमध्याग्नेयादिसाध्यमिति विशेषः प्रधानत्वाच्च परमापूर्वमेव प्रयोजकं
युक्तं यद्यपि चावान्तरापूर्वाण्येव प्रयोजकानि तथापि प्रकरणविशेषात्सर्वोत्तिसर्वेषां प्रयोजक
कानि तस्मात्सीकरः। अत्रापि धीयते सैति तावदवान्तरापूर्वाणि कुतः नह्याग्नेयादिकर्माणि
विनाशरूपाणि तैर्विनाशे हत्यपरमापूर्वं जनयेति स्वरूपतः तेषामद पूर्वाधिकरण एवाना
ज्ञातावेदप्रणे न प्रतिपादितं सस्त्वतेषु तादर्थ्यमेवावघातादेर्युक्तं प्रत्यासत्तेः यद्यपि चाग्ने
यादात्म्यवो न यत्र करणी तथापि साक्षाडुसन्निहितस्य पूर्वं करणत्वे तद्वारेण परमापूर्वे संबंधनिमि
त्तालक्षणान्तेन व्रीहित्वाद्यो यागद्वारेण पूर्वमुपस्थाप्य पयन्त प्रथमे तावदुत्पत्त्यपूर्वे निपततीतस्मा
पि दृष्टत्वेनाज्ञातप्रकारत्वात्परमापूर्वसिद्धोपयिकत्वेन च फलवत्त्वादतिक्रमकारणं ना

वान्तरं दर्शमेवावघातादेर्युक्तौ सत्यपि च सर्वे वीऽप्रकरणविशेषे श्रुतेर्व्यवस्थावगमादसंकरः एवं
चावघातादेर्दृष्टार्थता भवति अन्यथान्वदृष्टार्थतास्यात् । न च क्वचिद् दृष्टसंभवे तत एव विध्य
पपत्तेरर्थापत्तिपरिच्छेद्याद् दृष्टकल्पनया सर्वार्थत्वे युक्तमंगीकर्तुं अतश्च यद्यपि तावद् हेतौ
त्वे तावन्मात्रे श्रूयेत तथापि दृष्टार्थत्वादेव व्यवस्था स्यात् किमुत यदा व्रीह्यादिसंयोगे नैव क्र
त्वर्थे । तस्माद्यथासंयोगं व्यवस्था ॥ ॥ द्रव्योत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ॥ दर्शपूर्णमासयोः
स्फ्यश्चकपालानि चेत्युपक्रम्य एतानि वै दशयज्ञायुधानीति श्रुतं तथा स्फ्येनोद्धन्तीत्यादीन्यप
राणि वचनानि । तत्र संशयः किं स्फ्यादीनां येन यद् कस्मिन्प्रकरणे श्रावितं तत्सर्वं तेन कर्तव्यमुत य
थासंयोगमुद्धननाद्येवेति । तत्रायुधशब्दस्य साधनवचनत्वात् यज्ञसाधनत्वेन गम्यमाने
साक्षादसंभवे द्वारे ग्यवतरद्विशेषात् सर्वांगेषु विज्ञायते उद्धननादिसंयोगस्त्वनेनैव प्राप्त
त्वादनुवादः नैतद्युक्तं एवं हि वहूनामुद्धननादिवाक्यानामानर्थक्यं स्यात् न चानुवादत्व
मपि संभवति नित्यप्राप्तानामन्नहि उद्धनने स्फ्येनैव प्राप्तं अन्येनापि संभवात् पाक्षिकानुवादत्वे वा

कारकं स्यात् न वा मर्त्तस्य कर[illegible] सक्तौ सं[illegible] नवातिनाय । इयसौ [illegible] तत । [illegible] प्रकरणे
वाक्यप्रसक्त्यनिवृत्तेः न तावत् क्रिया [illegible] ते । स्यात् न वा द्रव्यः कारकत्वस्य द्रव्यसंबंधात् उपपत्तेः अनु
पाहानि वाच्य द्रव्याणि कथ्यते गुणः संबध्येत स्यात् तत्तृतीयया करणद्रव्याणि प्राकरणिकानि अन्य
था प्रतिपादिकार्थो गुणस्तत्परिच्छेदकत्वेन विधीयते ननु गुणस्य करणत्वे येन द्रव्यसंबंधो न स्या
त्तृतीयया वोपादानात् । द्रव्याणि नानुपादानदोषइतिचेत् तदुक्तेन हि तृतीयया करणं एतद्द्रव्या
न्विधायिनी विभक्तिर्यो हि कारकशक्तिनिष्ठ्याभिधायतया क्रियां विशिनष्टि ननु अद्वैतकरणा
दिशब्दवत् कारकोपसर्जनं द्रव्यमभिदधाति येन गुणः परिच्छेदकतया संबध्येत तन्न व्यक्तेः प्रातिप
दिकमेव गुणवचनमपि लक्षणया द्रव्यं प्रतिपादयति तच्च तृतीयासंयोगात् करणीभवति नन्व
रुणा गुणविशिष्टद्रव्यं करणरूपं प्रतिपाद्यते तत्र विशेषणानि करणद्रव्याणि प्रकरणगतानि
पन्नघविशेषणाः एतो गुणः परिच्छेदकत्वेन विधीयते येन द्रव्येण किं विशिष्यते तेनारुणागुण
केनेति नन्वेवं लक्षितस्य द्रव्यस्य क्रियएव करणस्य संनवा किमितिवाक्यभेदः नानेनलक्षिते

नित्यवच्छ्रवणविरोधः स्यात्तस्मादृतानि काम्यानि विधायकानि यज्ञायुधवाक्यत्वे तैरेव प्राप्तार्थत्वात्
वैशाहोरवेधादारभ्याता नावाद्यनुवादकं वरेव बद्धानर्थक्यादेकानर्थक्ये न तस्यानर्थक्यं कीयं
१० ज्ञायुधानि सीमन्तीतत्पनीतरश्रुतमादनविशिष्टत्वात् । तस्मादस्यानुवादत्वादितरे विधयोऽ
मताः । तेन स्फ्यादेर्व्यवस्था स्यात् कार्ये घद्भूनत्वादिषु ॥ ॥ अथैकत्वे द्रव्यगुणयोरेकक्रम्यान्नि
यमः स्यात् ॥ ॥ ज्योतिष्टोमे श्रूयते अरुणया पिंगाक्ष्यैकहायन्या सोमं क्रीणातीति तत्रारुणशब्दोऽयमाक्र
त्यधिकरणन्यायेनान्वयव्यतिरेकाभ्यां वा गुणवचनः पिंगाक्ष्यैकहायनी शब्दौ यौगिकौ सामाना नी५
धिकरण्यादेकद्रव्यवचनौ गुणाधिकाफलं व शब्दद्वयं न येकेन विहितेपरेण विधिर्न्न संभवतीति
वक्तव्यं तु तयोरपि शुद्धत्वे वद्द्रव्यवचनयोर्युगपत्प्रवृत्तेस्तदिहारुण्यमानीप्रतिसंदेहः किमनेन वा
क्या द्विर्वा प्रकरणे सर्वद्रव्येषु निवेशयामः किंवा क्रीणातिनामैव बध्यत इति सन्नेकहायन्यां नि
विशतइति तदर्थं यच्छक्रियासाधनत्वं संभवति नेति तत्र अमूर्तत्वाद्गुणो नैव क्रियां साधयितुं क्षमः
तस्मात् क्रीणातिनानास्य संभवत्येकवाक्यता क्रीणातिनासंबध्यमानस्तु तायया संयोगात्करण

द्रव्यांतरं शक्यं विधातुं श्रौतैकहायन्यवरुद्धत्वात् क्रयस्य एकहायनीतु स्वशब्दविहितान्
पुनर्लक्षणया विधातुं शक्यते अप्येकहायनीमेवानूद्य तत्रैव गुणो विधीयतां न तु विध्यतीति वा
च्यं नेदं नैवं शक्यं विधीयते ह्येत्रैकहायनी क्रयं प्रति गुणभूतावस्थायां वनासावेकस्मिन्ने
वोच्चारणेऽनुवदितुं गुणीप्रतिप्रधानीत्न वितुं परार्थ्ये वोच्चारयितुं शक्यं आवृत्तिप्रसंगात्
प्राकरणिकानि तु द्रव्याणि वाक्यांतरविहितानि शक्यन्ते वाक्यांतरेणानुवदितुं तस्मात् कृत्स्नप्रक
रणोक्तानि मानि विशतां इति प्राप्ते ब्रूमः। तृतीयया गुणस्यैव करणत्वं क्रयं प्रति विस्पष्टं गम्य
ते तच्च द्रव्यद्वारेण युज्यते। यद्यप्यमूर्तत्वाद् गुणो न साक्षात् क्रियां साधयितुमलं तथापि द्रव्यप
रिच्छेदमुखेन शक्नोति साधयितुं न ह्यपरिच्छिन्नं द्रव्यं क्रियां साधयति गुणश्च तत्परिच्छिनत्तीति।
युक्तमस्य क्रियासाधनत्वं गुणो हि साधनत्वेन विदधत् शब्देन यथानेन शक्यते साधयितुं त
था कुर्यादिति आह समासोऽद्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं नान्यथा तेनायमर्थो भवति
अरुणगुणपरिच्छिन्नेन द्रव्येण कुर्यादिति एवं सति भवति श्रौतस्यैव गुणस्य क्रयैकवाक्यत्वेन

लक्षणा वाक्यभेदश्च प्रयुज्यते। यदा च क्रयार्थत्वेन तदा तदा य एव द्रव्यो निवेशाद् एकहायन्या मेव निवे
शः ननु वासंप्रकृतीनामन्यानपि क्रयद्रव्याणि तेष्वपि निविशेतां न तेषां क्रयीतरद्रव्यत्वात् मि
न्ना हि ते प्रतिवाक्यं क्रया विधिभेदात् लक्ष्यन्ते विधयो न्यो न्यस्मिन्ननुत्पत्तिविशिष्टद्रव्यावरोधा
द्द्रव्यान्तरं विधातुमवकाशं कुर्वते स्तत्तद्द्रव्यविशिष्टक्रयविधानार्थाः न च विहितस्य विधाने सं न
6 वतीति सिद्धं क्रयभेदः तदाह नाध्याकारः ति नो हि वाक्य एकहायनी साधनके एकः क्रयाव बु
द्धो न वर्त्ति अरुणा साधन कमपि क्रयीतर मिति एवं हि वदन्त्याकाराभेदे क्रयभेदे दर्शयति तेन
ये गुणा कर्मत्वात् क्रयाणां भेदेन ते छंतिते न्यायविरोधात् [illegible] षष्ठ विरोधाद्वोपदेशो यः न च गु
णा कर्मणां भेदो नास्तीति राजाज्ञान्ये ऐन्द्रवायववादि ग्रहाणां भेदस्य पञ्चमस्य माधिकरणे दर्शित
त्वात् अतो नास्ति क्रयभेदः क्रयाणां तु विकल्पः स्यादित्यत्राधिकरणे क्रयाणामेव विकल्पसमुच्चा
यु विताने द्रव्याणामित्यविरोधः॥ ॥ एकत्वयुक्तमेकस्य श्रुतिसंयोगात्॥ ॥ एवं वित्तिरधिकर
णेः क्रमेणास्ते स्वकारद्रव्यगुणानो यथा संयोगे व्यवस्था संयोग एव त्विदानीं चिन्त्यते किं कि

उद्देश्यानां ग्रहतानां त्वस्थानां उपलक्षणं

वक्षितविशेषणेन विशेषिताशेषस्य संमार्गः किमविवक्षितविशेषणेनेति एवं हि श्रुतौ ग्रहं सं
मार्ष्टीति तत्र संशयः किमेकस्य ग्रहस्य संमार्गः उत सर्वेषामिति तदर्थं किमुद्देश्यगता संख्या
विवक्षिता नेति तत्र श्रुतिबलाद्ग्रहस्य संख्योपादेयगामिनी विवक्षिता न तथोद्देश्यगता श्रुत्य
विशेषतद्गतिप्राप्तेति ख्यायते उद्देश्यलक्षणं जातिर्यद्वा व्यक्तिलक्षणतया। तस्यो गमेष संमार्गः
सर्वस्येति विनिश्चयः यदि ग्रहत्वजातेरयं संस्कारः स्यात् ततस्तस्याः प्रतिव्यक्ति समाप्तेर्यत्रै
क्वचिद्द्रव्ये संस्कृते सा संस्कृतैवेति न द्रव्यान्तरे संस्कारः क्रियेत तस्यास्त्वमूर्तत्वादसाध
नत्वाद्यतल्लक्षितानां द्रव्याणां ज्योतिष्टोमाः सर्वसाधनानामयं संमार्गस्तत्रापि यद्द्रव्याणि
संमार्गं प्रति गुणभूतानि स्युः पशुरिव यागं प्रति ततो येन केनापि सिद्धैर्नामरूपं सर्वत्रैक
येतन हि यावद्गुणी प्रधानमावर्तयितव्यं प्रयोजनाभावात् ततश्च कियता वद्रव्याणामयं संमार्गः कर्ती
व्यः इत्यपेक्षायां भवति तस्या वापेक्षायां परिच्छेदकत्वेन संख्या विधीयते न पश्चैकत्ववत् प्रधानानि लि

हद्रव्यात्ति संमार्गं प्रति द्वितीयानिर्देशात् प्रयोजनवत्त्वाच्च प्रतिप्रधानं च गुणावृत्तेः सर्वेषां
समुच्चितानामयं संस्कार इति निश्चयान्नपरिच्छेदकापेक्षा तदभावाच्च न संख्याद वर्त्तमाणपरि
च्छेदकतयाहितस्याः क्रियान्वयो न च परिच्छेदः परिच्छिन्ने संभवतीति द्वाराभावान्न क्रियान्वयः सं
ख्याया विधातुं शक्यते विधीयमानमप्येकत्वं सर्वद्रव्येषु समुच्चयेन संमार्गे प्राप्ते एकसंख्यार्थं स्या
त् स च विदोषान्न चैकस्मिन्वाक्ये संमार्गविधिः परिसंख्या च संभवति वचनव्यक्तिभेदात् न
वास्य विधिरपि संभवति कुतः ग्रहस्य संमार्गे वै तत्र प्रधाने गुण एव वां सर्वेषा वाक्यभेदः स्यात्
अतो नास्य विधेयता विधीयमाने ह्येकत्वे यदि तावद्ग्रहैकत्वस्य विधीयते ततो ग्रहसंमार्गसं
बन्धो ग्रहैकत्वसंबन्धश्चेत्यपूर्वद्वयविधानाद्वाक्यभेदः स्यात् विहितमपि चैकत्वं ग्रहस्य रूप
मात्रोपहार्यं न संमार्गविशेषणमिति सर्वेषां संमार्गः स्यादिति अस्मात्पक्षाद्विशेष एवायं संमार्गा
न्वितस्य ग्रहस्यैकत्वं विधीयते न स्वरूपमात्रस्य नैवं शक्यं न हि संमार्गो ग्रहविशेषणमिति हि

विशेषणं भवति संमार्गोऽस्तिह ग्रहो विधीयते कथमसौ ग्रहविशेषणं युगपद् द्वाविधानविशेष
णान्वयोस्त्युपगमे का कानेदः ग्रहं संमृज्यात् ग्रहं संमृज्यात् स एक इति अपेकत्वविशिष्टग्रहस्य सं
मार्ग एकार्थो विधीयते न कश्चित् पूर्वोक्तो दोषः स्यादिति मतं केवलं तदा न वक्तव्या कार्थः य द्रुह ना
तीयमेकसंख्यैव द्रव्ये तस्य संमार्ग इति एवमपि सर्वेषां प्रत्येकमेकत्वात् ग्रहत्वाच्च संमार्गस्य च
तद्गुणत्वात् सर्वत्र प्राप्तिः स्यात् अपि च विभक्त्या युगपत् संख्याकारकत्वे वाच्यते न उप्रपाम
संख्यां प्रातिपदिकार्थं स्यादिति ध्याय पश्चात् द्वित्रिशिष्टस्य कारकत्वे येनैकत्वविशिष्टस्य ग्रह
स्य संमार्गं प्रति कर्मत्वं स्यात् तन्न तावदेकत्वं ग्रहविशेषणं अपि एतदपि पश्चैकत्ववृद्धि
भक्तिश्रुत्या कारकं सत् क्रियये व संबध्यते तेन त्वापि द्वयोर्गतिः स्यात् एकत्वस्यापि संमार्गः सं
मार्गोऽस्ति ह्यैकत्वं यदि तावदेकत्वस्य संमार्गं स्यात् ततो ग्रहमेकत्वं चोद्दिश्य संमार्गविधानात् द्व
द्वित्रयोश्चोपादेयवत् क्रियया व्यवधीकरणसीभवात् प्रत्येकमेवतान्यी क्रियासंबंधात् प्रत्युद्द

रथैवाक्यसमाप्तेर्वीक्षणेदः पुनरप्येवग्रहस्यैकत्वानपेक्षस्यैव संमार्गः। सर्वग्रहसंमार्गः स्यादित्य
स्माल्पक्षसिद्धिः। अथैकत्वसंमार्गस्य गुणाइत्युच्यते तदयुक्तं नहि द्वितीयागुणत्वेव इतिप्राधान्य
वाविनाहिसा अथ सक्तुवल्लक्षणया गुणत्वमुच्येत न श्रुतिसंभवे सायुक्ता किंचतयासतिग्र
हस्यापि गुणत्वे स्यात् अथैकत्वस्य गुणत्वं ग्रहस्यच प्राधान्यमुच्येत नतच्चैकं यो हि सक्तु
पात्ताद्वितीया विनक्ति ग्रहापेक्षया प्राधान्यं श्रुत्या त्विद ध्याल एकत्वापेक्षया गुणत्वे लक्षयेत
न्न कथंचिद् एकत्वं विवक्षितुं न्याय्यं ।। संस्कारार्थाद् गुणानामव्यवस्था स्यात् ।। किमेकत्ववत्
प्रातिपदिकार्थस्याप्यविवक्षितत्वाद्ब मुख्यानामपि संमार्गः कर्तव्यः। उताश्विनाकारेणाना
वाल ग्रहाणामेवेति विचारः। तत्र संमार्ष्टीत्येतावदुक्ते सोमायमेक निर्हरणानावाल ग्रहाणा
मेवेति विचारः। तत्र संमार्ष्टीत्येतावदुक्ते सोमावसेक निर्हरणप्रयोजकतया सोमपात्राणामि
त्यवगमात् … कस्यत्यपेक्षा नावाद विवक्षितं ग्रह ग्रहणमेकत्ववदुपलक्षणमात्रं अपि वसो
मयागस्यैकत्वात्तदपूर्वमप्येकमेव तत्साधन निवेशी संमार्गश्चमसेष्वपि तत्साधनेष्वतदि

तुमर्हति न ह्यत्र कर्मभेदोऽस्ति येनापूर्वभेदे द्रव्यघातादिवत् व्यवस्था स्यात् तस्माद्धमसेध
पि स्यादिति प्राप्तेऽभिधीयते न हि ग्रहाविवक्षायां वाक्यभेदः प्रसज्यते। यागैकत्वेऽप्यपूर्वाणि त्रि
धीते स्यास भेदतः न तावदेकत्वविवक्षावदूहविवक्षायां वाक्यभेदोऽवरूपं हि सोमार्गः कस्य
चिद्विधातव्यः। तत्र ग्रहोपनीते ग्रहमुद्देशेन युक्तैयत् सामर्थ्यात्त्वी सोमपात्रमात्रं गम्यते ए
कस्यापि च यागस्याभ्यासभेदात् तेषीवापूर्वमेतरेण संहत्यकारित्वायोगात्। अवरूपे प्रत्ये
स्याम समपूर्वाणीति धीते तत्र श्वग्रहस्य हृत्यं लक्षितापूर्वविशेषनिबंधनः संमार्गो न च समसे
षु कर्तव्यः॥ ॥आनर्थक्यात्तदंगेषु॥ ॥सप्तदशारत्निर्वाजपेयस्य यूप इति श्रूयते तत्र सं
शयः किं सप्तदशारत्नित्वं वाजपेयसाधनकृतो यूपपात्रद्वारेण वाजपेयीगं तत यूपद्वारेण
वाजपेयांगं उत यूपद्वारेण पश्वंगमिति तदर्थं च किं सप्तदशारत्निर्वाजपेयस्येति वचन
व्यक्तिः उत सप्तदशारत्निर्यूप इति तत्राव्यवहितत्वात् प्रधानत्वात् प्रकरणानुग्रहाच्च सप्त
दशारत्निर्वाजपेयस्येति संबंधः परिमाणीवसासाहात् कर्मणि न संभवतीति तद्वे सोधन प्रतो

र्ध्वपात्र द्वारेणासंबध्यते यूपशब्दश्चोर्ध्वपात्रएव साहश्यादुक्तो तेएवा वाजपेयस्य तेषञ्चातदसं
बंधः ऊर्ध्वपात्रस्तु द्विरूपस्सप्तदशारत्नित्वेन विहिते तद्वारेण वाजपेयांगीभवति एवं च वाजपेय
शब्दः श्रुतिवृत्तो भवति यूपसंबंधेतु वाजपेयस्य यूपात्वावात् पशुयागसंबंधित्वात् यूप
स्य वाजपेयशब्दः पशुलक्षणार्थः स्यात् । नन्वितरत्रापि यूपशब्दो गौणः सत्तु न दोषाजघन्य
त्वात् यूपशब्दस्य वाजपेयस्य तु मुख्यत्वात् न लक्षणायुक्ता तस्मादूर्ध्वपात्रे निवेशः स्यादेवं
यदि यूपेन संबंधे लक्षणा भवेत् वाजपेयश्रुतेर्नासौ श्रुतिवृत्तैव सा यतः । षष्ठी संबंधमा
त्रार्थानां गौणत्वमपेक्षते नाप्यवधि संबंधे देवदत्तस्य न पूर्ववत् । यूपस्य च पशुद्वारा
वाजपेयोपकारः । संबंधमात्रमस्त्येव क्रतुनातो न लक्षणा नु ऊर्ध्वपात्रेण संबंधे यूपशब्दस्य
गौणता । अनंतरेण संबंधः प्रधानेन च संगतिः । प्रक्रियास्तु ग्रहश्चैवं नादृत्य श्रुतिबाधतः ।
तेन सप्तदशारत्नि यूपइत्येव संगतिः । सा च प्रकरणाद्वाजपेयसंबंधि यूपगा तेनायं वाजपे
यस्येत्यनुवादो भविष्यति ॥ ॥ कर्तृगुणे तु कर्म्मासमवायाद्वाक्यभेदः स्यात् ॥ ॥ दर्शपूर्णमास

योः प्रयाजसमीपे श्रूयते अग्निक्रामं जुहोतीति तत्र नाप्यकारेण जुहोतेः सन्निहितप्रयाजवि
षयत्वं तिद्वद्धृत्वा किमतिक्रमणं तेनैकवाक्यीसंकर्त्रा संबध्यते किं वा ततोत्ति नीकृत्य
प्रकरणोत्कर्षेति विचारितं एवं च पूर्वः पक्षः क्रियया कारकस्यैव नान्यस्यान्येकवाक्यता
न चातिक्रमणं मूर्त्तिवर्जितं कारकैर्न वेदः । न चारूणवत् द्रव्यद्वारेण संभवति तत्र हि एकहा
यनी द्रव्यमुपात्तं मुक्तेः यद्द्वारतां प्रतिपद्यते अत्र तु जुहोति नाकर्त्तु रूपादानान्न द्वार
त्वं तस्माद्विच्छिन्नं प्रकरणे न गृह्यते शक्यते च क्रियायाः प्रकरणग्रहणं प्रयाजादिवत्
सो भवति हि कर्मणः कर्मोपकारकत्वं कारकत्वेन तु न सो भवति तस्माद्दर्शपूर्णमासयोर्गसं
रसामर्थ्याल्लिङ्कर्तृत्वं स्कारकं भवति कर्त्तृवप्रयोगाङ्गमिति सर्वप्रयोगसंबंधोतिक्रमण
स्येति सिद्धान्तिस्तु । अनुपात्तोपि स द्रव्यमात्रेण द्वारतां व्रजेत् । कर्तृत्वे क्रमणेतेन भवेद्धो
मस्य साचनैवार्त्तिककारस्य । अतिमतिक्रमणं न क्रियातोन्येन संबध्यते तस्माज्जुहोतिना
संबंधस्तस्य कृत्वाहननततो विच्छेदाऽगोकेत्यन्यथाधिकरणं वर्णयांचकार श्रुतिक्रामं जुहोतीति

प्रादुर्भवंति ३

होमानुवादेन विधीयमानमस्ति क्रमणे किं प्राकरणिकसर्वहोमाङ्गं उत प्रयाजहोमस्यैवेति
संशयः। तदर्थं किमवान्तरप्रकरणमस्ति न वेति। फलवद्भावनोक्तकथंभावतिरोहिता नै
वाङ्गानां कथंभावः प्राकृतः इति तन्मतम्। प्राक्तु यदि वाङ्गानां कथंभावास्तनोमिषा। तेषा
मङ्गाङ्गितापत्तेरयैव स्याञ्च सञ्जपेत। तस्मान्नावान्तरप्रकरणं तदभावे च सन्निधिमात्रेणा
स्ति क्रमणे प्रयाजाङ्गं स्यात्। सत्यं तु बलवत्प्रकरणाद्दर्शपूर्णमासभावनया संबंधा
त् तदीयसकलहोमाङ्गमस्ति क्रमणं बर्हिर्धर्मवत्। न चास्त्यवान्तरप्रकरणे वाक्ये नै
व प्रयाजाङ्गतास्यात्। अस्ति क्रमे जुहोतीति नैवं जुहोतेः साधारणत्वेन प्रयाजोपस्था
पनाभावात्। नन्वनुवादोयं सन्निहितगामी प्रयाजाश्च सन्निहिताः नैवं बुद्धिवि
परिवृत्तिरनुवादस्यापेक्षिता न पाठप्रत्यासत्तिः तथा सत्यप्यंतसन्निधानात् उत्तमप्र
याजस्यैवास्ति क्रमणेऽङ्गं स्यात् न समिदादीनां तथा बर्हिषि हवींष्यासादयतीति यस्य
हविषः कियान् पि पाठतः सन्निधिविशेषोस्ति तस्य बर्हिष्यासादने स्यात् नान्येषां बुद्धिवि

[illegible marginal note]

परिवृत्तिश्च सर्वहोमानामविशिष्टा प्रकृतत्वादेवान्तो वर्हिर्हविः शाखस्येव जुहोतीत्याहृस्या
पिसीकोवायोगात् सर्वहोमागमस्तिक्रमणमिति। तत्र वेदेवं प्रयाजानां नास्ति प्रकरणं यदि
तेषां वचनस्तेषु नाये गुणाः विहिताः पुरस्पश्चाद्वा ये विधास्यन्ते। सेदत्वमिदमुक्तं अभि
क्रामं जुहोतीति न ततोन्यत्र गच्छति प्रयाजान्विधाय समानयत उपभृत इत्यादि गुणविधा
यानि क्रामं जुहोति स्तुतकायो वै प्रयाजानां मिथुने वेदस्समिधो वर्हिरिव यजतीत्यादि यावत्
प्रयाजानिष्ट्वा हवींष्यभिघारयतीति प्रयाजपरामर्शे दृश्यते नारम्भ नमेतावता प्रदेशेन प्रयाजाः
समाप्यन्ते तद्रूत्पवगमात् ननमध्यापतितं अभिक्रमणं तदतिक्रमेणान्यत्र गच्छतीति विद्यते वाङ्ग
भावनानामप्यविज्ञातप्रकारत्वात् कथमित्याकांक्षितं प्राप्तं न विद्यते तु सेदं शेषो यत्र वायनि
के गुणैः। तत्राङ्गानीकथंभावः सेन्नप्यविनियोजकः। निष्फलत्वेन सर्वेषामेव विशेषोवगम्य
ते। कः शेषः कस्य शेषित्वमतः सर्वप्रधानां। अव्यवस्थाप्रसक्तिश्च योक्ता सैवं निराकृता। संदि

समति संदष्टं तदंगमितरस्तु नः। सर्वं प्रधानगामीति नाव्यवस्थाप्रसज्यते। यस्त्वाह साधिका
रत्ना मिति कर्त्तव्यता स्थिता। नान्येषामिति तस्यापि प्रतिज्ञामात्रमेव तत्। अविज्ञातप्रकारत्वा
दुन्नयेषी हि सात्त्वेत्। तान्यपि ह्यनुष्ठेयानि न वेदनुष्ठानमेव न स्यात्। एतावांस्तु विशे
षो यदेषामन्यार्थमनुष्ठाने साधिकाराणां तु स्वनिष्ठमिति। न चैतावता विशेषोऽन्यार्थस्या
पि अविज्ञातप्रकारस्यानुष्ठानासंभवात्। प्रयाजैरुपकृत्य प्रधानस्योपकुर्यादित्युक्ते
यो नाम प्रयाजैरुपकर्तुं न जानाति तस्य तत्त्वदपेक्षः कथममीत्निरुपकर्त्तव्यमिति प्रया
प्रयाजैरुपकर्तुं न जानाति तस्य तत्त्वदपेक्षो कारविशेषापेक्षा सत्याम् अपि तस्यां यदि सैदं
शापतितमंगीतस्यास्ततो विशेषाः सर्वं फलवदंगं स्यात्। प्रकाराकांक्षा तु वाचनिकैर्गुणै
रर्थापत्तिलभ्येन वस्वरूपनिष्पादनेनावमनादिति विश्वदर्विहोमवत् पूर्यते। अतिक्रम
णी तु सैदंशापतितत्वादवांतरप्रकरणांदृते। प्रयाजा गौर्यैकदेशिनां त्ववांतरप्रकरणात्तावा

संनिधिवाधेनप्रकरणाविच्छेदात् सर्वार्थस्यादित्यास्तीनावत्॥ ॥संदिग्धेतुव्यवायाद्वाक्य
भेदस्यात्॥ ॥दर्शपूर्णमासयोः सामिधेनीर्विधाय तासांच त्रिः प्रथमामन्वाहेत्यादिव
चनैर्गुणान्विधाय ततो निविदो नाममंत्राः देवेद्धो मन्विद्ध इत्यादयो विहिताः ततः काम्याः
सामिधेनीकल्पा विहिताः तदनंतरं यज्ञोपवीतमाम्नातं उपव्ययते देवलक्ष्ममेव तद्
कुरुत इति ततः पुनरपि सामिधेनीनामेव वाचनिका गुणा विधास्यंते श्रीतरां न्यूंच्य
स देवत्वाय त्वादयः तद्यज्ञोपवीतप्रतिसंदेहः सामिधेन्यंगं तु तद्दर्शपूर्णमासांगमिति
तदर्थं च किं सामिधेनीनां वाचनिकगुणो द्रुतमवांतरप्रकरणं उपवीतविधावनुव
र्तते अथवा विच्छिन्नमिदं निविच्छिरिति। अनुवर्त्तेत तदंगत्वे विच्छिन्ने दर्शाद्यंगता
किं प्राप्तमुन्नयत्राचापि कार्त्तनादनुवर्त्तेत। पुरस्तादुपवीतस्य परस्ताच्चापि कीर्त्तने। विद्यते
सामिधेनीनामतः प्रकरणास्थिता निविदस्तु पश्चाद्यन्तु मेत्रणा मेत्र वक्ष्यपरप्रकरणा

पठितादुपस्थवगतेर्व्व । अथर्वाणि विदामपि तादर्थ्यतस्तकथं भावसंगतौ ॥ नवांगैर्व्यवधीयीते प्रधानानि कथं तन । कामेष्ट्यपाश्रयत्वेन तासामेवानुवर्त्तनी । उपवीतमतस्तासामी
गी प्रकरणाद्भवेत् । एवं प्राश्ववदामोत्र निविदि र्व्यवधानतः । विछिन्नास्सामिधेनीनीप्र
क्रियाह्रानुवर्त्तते । यस्तु संनिधानस्य वासंवेद्यितिः पूर्वैः र्व्यवधानेन प्रकरणस्याति
वदतितस्य सर्वकर्माणां सर्वप्रकरणानुवृत्तेः सर्वधर्माः सर्वेषामुपदेशेनैव स्युः अ
तो विश्वजिदादीनामपि क्रत्वर्थत्वं स्यात् । यत्तु निविदामपवीतरप्रकरणे न सामिधेन्यं
गत्वादव्यवधायकत्व मित्युक्तं तदयुक्तं लिंगेन हि प्रकरणं बाधित्वा निविदोग्निसमिंध
नो गैनवैतिनवाग्निः सामिधेन्यंगैनवतियेन तद्वारेणा निविदोपितदंगं स्युः किंतु सा
मिधेन्य एवाग्न्यंगे निविदोपिन तासां मिथः संबंधः यथावद्युतिगुणानीवपरार्थत्वाद
संबंधइतितेनासां संवेधितिर्निविस्पदेदेत्रौपूर्णमासीगे विछिन्ने सामीधेनीनी प्रकर
णीनोपवीते ॥ ७ ॥ ह्वातिनन्वेवं निविद्गमुपवीतेस्यात् न तासां प्रकरणमस्पजितः कीर्तना

तावांसन्निधिमात्रमपि नास्ति। काम्यैर्व्यवधानात् तर्हि काम्यानामेवाङ्गी स्यात्। अव्यवधा-
नात् फलावच्छेदेन च प्रकरणसद्भावात् न तेषां विकृतित्वादिह हि न नित्यसामिधेन्याश्रये-
न गुणमात्रं फलाय विधीयते विच्छिन्नप्रक्रियाणां तासामाश्रयत्वानुपपत्तेः। वाक्येन काम्य-
यसंबन्धे वाक्यभेदात्। किं च वचनान्तराणि सीरव्यादिविशिष्टानि फले विधीयते[illegible] नि वसीरव्या- तानि
युक्तानुवाचनत्वसामान्यात् नित्यानुवचनप्रकृतीनि तद्वच्चतासामप्येवमत्येषां च तद्धर्मी-
णां प्राप्तिरनुशब्देन च यत्र नमः प्रवक्त्र इति निगदान्तरस्तावः सामिधेनीगतत्वेनोक्तः सो-
प्यत्रापि द्विरूपत्वे सवनि[illegible]गदः क्रतूपयुक्तत्वान्न बहिः प्रयोगे [illegible]तेतत द्वंद्व स्तद्द्वयोनानुवच-
नान्तराणामपि क्रतुमध्यप्रयोगासिद्धिरेतैरेव चाग्निसमिन्धनस्य प्रसंगात् सिद्धेर्नित्यानु-
वचननिवृत्तिः तेनैषामनुवचनानां क्रतूपकारप्राकृतधर्मापरिष्कृतानी कथं तावा-
पेक्षा तावान्नास्ति प्रकरणं सन्निधानमात्रं तु स्यात् तद्बहुर्वलीप्रकरणादिति दर्शपूर्णमासी

१३

13

ग मेवोपवीतं येतु पश्चात्तनास्तु एणाः ते दूरस्थानुवादे नैव द्वादशोपसत्त्व व द्विधात्तुं वाक्याद् इति नत

वको नैकातत: प्रकरणानुवृत्तिर्विज्ञायते यत: प्रकरणे पाठो निर्दिष्टं स्यात् यद्वा तिष्ठन्नन्वाह

त रान्नूच्य मित्यादिषु अनुवचनमात्रं श्रूयते तत्र यदि सामिधेन्यनुवचने प्रकृतं स्यात् ततस्तदेवा

ङ्गमेतत् तद्भावात्वनुवचनमात्रमनुवाक्यादि साधारणमिति न सामिधेन्यनुवृत्तिरवधार्यते

यद्यपि द्वावावैसामिधेन्यावीरन्नूच्येते वचने तदप्याद्यार्थवादत्वान्न सामिधेन्यनुवृत्तिं सूच

यतो। तस्मात् दर्शपूर्णमासौ गमुपवीतं। एकदेशिनां चवोतर प्रकरणाभावात् सन्निधेश्च प्रकर

णात् दुर्बलत्वादसत्यपि विच्छेदे सामिधेनीनीर् दर्शपूर्णमासांगत्वमुपवीतस्य सिद्धांतोक्ति

[illegible]

व्यर्थमिदमधिकरणं स्यात् कश्चिन्त्वाहनुपव्ययत इत्येकं पदम् अन्वितान्तिधानाय कर्तारमपे

[illegible]

क्षमाणं संनिहितेन कर्त्रान्वीयत इति तद्युक्तं प्रत्ययार्थेनापूर्वेण धातोरन्वितान्तिधानत्वे सा

मिधेनीनीमसन्निपाति त्वे नाहर्वं श्रुत्यन्यत्वात् श्रुत: पदश्रुत्यैव तद्गमुपवीतं भवनातिकिमर्थ

सिद्धे रेवशंपवाने नप्रत्यपेनसत्यपिसामधेनीनां संनिधाने ऽधिकारापूर्वमाधाविधातर

[illegible]

मिदमधिकरणं अपि चैवं सर्वाधिकरण सर्वेपदेष्पि विच्छिन्नमप्यतिक्रमणीः एकपदत्वात्
सन्निहितेनैव प्रयाजकर्त्रान्वीयत इति तदधिकरणवैयर्थ्यं स्यात् नन्वतिक्रममित्य
नाख्यातत्वात् सिद्धवत् प्रतीतेर्नकर्त्राकांक्षा किंतु शेषिभूतेस्तत्र कर्तापेक्षितो न च
शेषिणान्विताभिधानमिति नैव मव घातादिषु शेषिणाप्यन्विताभिधानानुपग
मात् अपि च सर्वोप्युपकार्याणि पदानि कार्येण शेषिणान्वितमर्थमभिदधतीति
यत्किंचिदेतत् अपि यदि न शेषिणान्विताभिधाने वेनन्तर्यान्वितमतिक्रमणमभिधात
व्यं न हि नन्वितस्याभिधानसंभवति गुणभूतस्तु कर्तानपेक्षितत्वात् न तेनान्विता
भिधानेसंभवतीति चेत् संभवेवा सन्निहितेनैव प्रयाजकर्त्रान्विताभिधानात् व्यर्थ
मेकवाक्यत्वप्रतिपादनं प्रधानविधिनातिक्रमणमन्वितमभिधायत इति चेत् तस्या
पि शेषित्वादुपवीतस्यापि तत्संभवात् संनिहितेनापि साभिधेनाकर्त्रान्वयः स्यात्।
अप्रधानाभिहितमतिक्रमणं ग्राहकोग्रहीयात् उपवीतमपि ग्रहीयात् यदपि शेषि प्रत

कर्त्तापेक्षितो नानुष्ठातृ भवत इति तदन्य विपरीतमविहितस्पर्शो ... भावात्कर्मापेक्षात् कि
यास्वाभाव्यादेवस्यादित्यास्तीनावह॥ ॥गुणानां च परार्थत्वादसंबंधः समत्वात्स्यात्॥ ॥आधा
नप्रकरणे वारणावैकंकतानि यज्ञसंयुक्तानि पात्राणि श्रूयंते वारणो यज्ञावचरः। वैकंकतो यज्ञावच
र इति पवमानेष्ट्योराधानप्रकरण एव प्रदेशांतरे श्रुता॥ तत्र पात्रेषु संदेहः। किं पवमानेष्टिगी
नुत यज्ञमात्रांगमिति तदर्थं च किं पवमानहवीराधानांगमुत तान्यपि आधानेन समप्रधा
नान्यंगान्यपीति। आद्ये गीतत्वो यज्ञसंयोगात् साक्षादाधानेन संभवेत्यपि पात्राण्यपानर्थक्यं तं
दंगन्यायेन पवमानेष्टिषु भवेति। अनंगत्वे तु कथंचिदपि यज्ञसंयुक्तानि प्रकृताधान निवेश
संभवात् इष्टीनां स्वयमप्रकृतत्वात् अनारभ्यवादरूपेण सर्वयज्ञेषु संभवंति। तत्राधान
स्पृष्टता यासंयुक्ताग्नि संस्कारार्थतया फलवत्त्वात् फलानि पवमानहवींषि प्रकरणाद्दं
नीं अंतरोच्यते यदाहवनीये जुहोतीति वाक्यादेषाम् ... पूर्वतानन्वनारभ्यवादो पि सर्वहोमांग
माहवनीयं विधत्ते न त्वाहवनीयांगत्वं पवमानहविषां मंत्र कश्चिदाह अनारभ्यवादेन प्रकृ
ताधाहवनीयांगत्वेन विहितं पवमानेष्टिष्वतिदेशेन प्राप्तः स च पवमानहविर्बलाया मानि

लवरौवोरन्नीवगतमवधानस्यांगत्वंन निवर्त्ततेइतितथनास्त्विद्धांत प्रसरणमत्र ४

उपन्नत्वाहन्नीगेसे भवता त्वंगत्वे निवृत्तेयत्तस्यप्रकृतौदृष्टः साक्षात्संबंधोन्द्रः सइहस्तं तवेन
बाधनीयो वस्तुत्वपवमानहविषामाधानीगत्वादिनाप्यग्निनिष्पादकत्वमभ्युपगत
मेतच्चप्राकृतसाक्षात्संबंधाबाधायसाक्षादेवास्तु किमाधानप्रनाड्यासमाश्रयितइति।
सिद्धमग्न्यर्थत्वं तदिदमसारं यत्तावदुक्तमंगत्वं निवृत्तमितितत्रस्वसिद्धांतप्रसरणान्नहि
चोदकावगतमंगत्वं निवर्त्ततेयद्यपि चानि उपन्नत्वान्नसाध्यतेतत्राप्यसाध्यतएवांगत्व
मवघातस्यवत्कृष्णलेष्ववघातवत्तिष्ठते तेनसाक्षात्संबंधस्यांगत्वेनैवप्रकृतिवदुपपन्नत्वान्न
तत्सिध्यर्थं साध्यत्वमंगीकर्त्तव्यंअपि चार्थिकः प्रकृतौ साक्षात्संबंधोंगत्वमेवद्यास्त्वार्थो नचा
र्थिकं चोदकः प्रतिदिशतीति यद्युक्तं लेनसाध्यतास्यात् अतिदिष्टपतीवासंबंधः सलुयेनकेनापिप्र
कारेणसिध्यतीति साध्यत्वविशेषः नु तोत्लभ्यतेयत्त्वसाध्यत्वमाधानांगत्वादिनाभ्यभ्यु
पगतव्यमिति सत्यमभ्युपगतं अस्तिहितस्यप्रकरणीप्रमाणं भवतस्तु किं प्रमाणं प्रकरणामेवे
ति चेत्तत्रतथासत्याधानांगत्वद्वारेणैवाग्नीनांसाध्यत्वंस्यात् यदिद्यविशेषितेसाध्यत्वंप्रकर

विध्यनिरादिवत्फलं कल्पयित्वाऽङ्गानां मंगलमेव स्यात्। अस्तु वा तिदेशादवगतत्वात्साक्षाद
ङ्गत्वसिद्धेरतस्तोतिदेशाव रोन सान्नाय्यत्वादित्याग्नि श्रीयेतन्नत्वर्थमेवञ्चप्रकरणादवगम्य
तेनाविनिष्टसाध्यत्वं तेन यदि प्रकरणमेवानि क्रियेताधानाङ्गत्वमेव स्यात्। न चैतत्साध्यत्वमेवन
स्यात्। ते सेबंधबलादेवसाध्यत्वं तत्तूपदेशात्मकप्रकरणावगतक्रत्वर्थविरोधाद्वाधितत्वे श्र
पिवकरणत्वेपीष्टानीनत्वतिसान्नाय्यादिषुसाध्यत्वमग्नीनां नाहि सकलप्राकृतांगाहि तोप
कारसविवाश्रग्नीन्द्रसाधरीतितेनाऽङ्सर्वांगानुष्ठानादेव स्थितमुत्पत्तपूर्वं द्वारकृतमेवा
कृत्वंवीतस्यनाऽङ्गाग्नीनीसाध्यत्वेन सान्नाय्यादिवच प्रकृतावाहवनीयस्य साक्षात्संबंध
श्रींगभूतेनहि प्रक्षेपेणाहवनीयस्य संबंधो न सान्नाय्यागेन तादृशोपि प्रकृतिवदतिदेशात्
प्रनाऽङ्गैव संबंधस्यात्तस्मान्नैव मग्न्यार्थता सिध्यतीत्यपनयदुत्तरं वोर्वा तदुच्यते श्रयमनिप्रा
योभाष्यकारस्य श्रनारभ्यविधानेन सत्येनाधग्न्यार्थता नवेत्। तद्वत्तीवाकामस्त्यन्यत्फल
वमानेष्टिसंबंधो। तेनाग्नीनामाग्नेरन्निष्पन्नस्यैवसाधनत्वेन विधानासंनवान्तस्यैवनिष्पादि
यितव्यस्य फलवतः साधनत्वेनाफलानि पवमानहवींषि विधीयंते सन्नमीवलक्षणया साध्य
त्वमेव प्रतिपादयति तच्चोपयन्निदधानि यतीति वत्। तस्मादाधानेनाधानवत्। पवमानहविषामग्न्य

पवमानहविषांऽङ्ग
नप्रकरणमहणान्
गोन्तारे २

नान्यादवाच्यमिवारादने नाकवार्थत्वान्ने सोवपत्तोद्धन्ककारणेनाधानाद्धत्पार्थे तैनवाक्येनप्रकरणेनाधिकरणसर्वयज्ञार्थत्वंपात्राणां
तदुपादानस्यां आर्थत्वं तेन स्वार्थे

र्थत्वात्तन्नाधानाङ्गत्वं अतः सर्व्वयज्ञार्थानि पात्राणीति आचार्यस्तु सत्यपि पवमानहविषामग्न्य
र्थत्वे पात्राणां वाक्येन सर्व्वयज्ञार्थता सिध्यतीति वाक्यद्वयपरिकल्पना क्लेशेन मन्येद्वी
हीन वहेतीत्यादिषु यथाश्रुतव्रीहिमात्रार्थत्वेव धातस्यानर्थक्यादुक्ते प्रकरणानुप्र
वेशात् तद्द्वारेन व्रीहिशब्दस्य साधनरूपलक्षणाश्रयणी इहतु यथाश्रुतयज्ञार्थत्वेपि द्वा
दशाणीयार्थस्य वचनाद्वियमस्यानर्थक्याभावान्न लक्षणाश्रयणेन प्रकरणानुवेशात्कल्प
य नान्याय्यादिपवमानेष्टिसंनिधौ पात्राणि यज्ञार्थानि श्रूयन्ते ततोनुवादस्य सन्निसंनि
वेसन्निहितगामित्वात्समशब्दद्वारनित्यमिव वाजपेयप्रकृते विवच्छन्दसंनिधापि ऐन्द्रपेक्षका
लहोमवच्चसोर्येप्रकृतिवच्छन्दसंनिधापि तेषु प्रयाजेषु पवमानेष्ट्यनुवादेन विधाना
तास्वेव पात्राणि स्युः ननु तासामिह सन्निधानमस्ति तस्मात्प्रकरणात् पूषाद्यनुमंत्र
णवत् अनाहवनीयेष्टानि पात्राणि सर्वार्थानीति नार्थाधिकरणे न सूत्रे तु सर्वाधिकरणएव
एदात्तरत्वेन व्याख्यायं निविष्ट एवं वायात् सामीचेना वाक्यस्याभावान्न वाक्यस्य चेदः स्यादि तु

शंकापरोत्तरत्वे नशंकोत्तरत्वेनाधिकरणएकाधिशंकापरानीहार्थः

५ तेन निविदी सामिधेन्यंगत्वात् अव्यवधायकत्वं स्यादिति यद्वदन्ति तेषामुत्तरं गुणानां स्वप्र-
धानार्थत्वादिति निविदोपि लिंगेनाग्निसमिंधने गुणभूताः सामिधेन्योपि अतो न तासां मिथः
संबंधः ॥ ॥ मिथश्चानर्थसंबंधः ॥ ॥ दर्शपूर्णमासयोराज्यभागौ सोमश्चाग्निश्चाज्यभागौ विहितौ
तयोः क्रमेनुवाक्यावनुष्टाय मामनाते आग्नेयी सौमीवत्येकं आग्नेयी सौमी च त्वपरं तत्र प्रथ-
म द्वितीयवार्त्रघ्नौ पौर्णमास्यां तायाचतुर्थी वृधन्वत्याविति आपरे वचने वार्त्रघ्नौ पौर्णमास्यामनू-
च्येते वृधन्वती अमावास्यायामिति तत्र संदेहः किमाज्यभागयोः क्रमप्राप्तामेत्रास्ता भ्या-
मात्रिघ वचनेन प्रधानांगतया विधीयेते उताज्यभागयोरेवाव्यवस्थया प्राप्तयोर्युगलयो-
र्व्यवस्थामात्रमिति तदर्थं वास्मिन्वचने पौर्णमास्यमावास्याशब्दौ कर्मवचनावुत कालवच-
नाविति तत्र। कालस्यास्मरणीयत्वात् न मंत्रेण प्रयोजनं नापि प्रकरणी तस्य तेन नास्य वि-
हायते। कर्मणः प्रकृतत्वेन मंत्रापेक्षितया पि [illegible] पौर्णमास्यमावास्याशब्दाभ्यां मंत्रविधीय-
ते। सप्तमी यह शब्दे अमावास्यायां चेदिमितिवत् प्रधानेष्वविरुद्धा तस्मादाद्येन क्रमेण वा वि-

त्वात्प्रधानार्थमित्याह इति नैवं यद्यपि कर्मैव शास्त्रात्यौ प्रतिपाद्यते। तथापि सूक्तमौत्सुक्यान
प्रधानत्वं सर्वत्र वः। दर्शपूर्णमासाभ्यामिति लक्षणेन बहत्वान्मुख्यार्थः सन्तर्वोन्नवेह
सोमस्यमेतस्यप्रधानेषु सामर्थ्यमस्ति। सोमस्यप्रधानदेवतायाः अभावात् अग्नीषोमी
यप्रवृत्तिसहितस्य देवतात्वेन केवलस्यामावास्यायां तु नास्त्येव सोमः। नचवचनाद्यथा
र्थत्वं लिंगेहि वाक्याद्बलीयः। वाक्याद्धि कर्मणः प्राधान्यं लक्षणाश्रयणात्तु न श्रुतेरर्थात्
विधिवाक्यत्वान्मैत्ररूपं बाधेनयथैवाधृतेन नोपपद्यते। तत्तु व्यवस्थामात्रमपेक्षितं अग्नी
यविधिबलात्तु तयोरमवाधेनैव वर्त्तते पौर्णमासीगतयोराज्यभागयोर्वार्त्रघ्नौ अमावास्या
गतयोर्वृधन्वत्याविति यद्वा कालद्वारेणाकर्मत्ति श्रावृधवृत्तेः कालेमुख्य इति तद्वारेण
व्यवस्थाविधीयत इति आज्यभागयोरेव मीमांसा॥ ॥आनन्तर्यमचोदना॥ ॥दर्शपूर्णमास
योराम्नायते हस्तावनेनिक्ते उलपराजिं स्तृणातीति तथाज्योतिष्टोमे मुष्टीकरोति वाचं
यच्छति दीक्षितमावेदयतीति तत्राह हस्तावनेजने हस्तसंस्कारार्थं मुष्टीकरणवाग्यमनेव

मनःप्रत्तिधानार्थं तेनत्रयमपि लिंगात्कुरिष्यमाणं कर्मांगमिति किमनीतरयोनुत्प
पत्तिस्तरणादाहि तावदनयोरंगीकृतसर्वांगमिति सिद्धाय: तत्रानीतयोर्द्देकवाक्यात्वात्स्वां
तरप्रकरणाद्भूतमात्री गत्वेप्राप्तेत्तिधीयते लिंगप्रकरणाभ्यां । हि सर्वार्थत्वं प्रतीयते । अ
मध्यदुर्बलस्त्वाभ्यामतः सर्वार्थता नवेत् नवा रव्यातद्वयस्य यच्छब्दाद्युपबंधरहितस्य
एकवाक्यत्वं सेनवति येनवाक्येनवृतार्थं स्यात् । नचस्तुत्यादिविहितीगसेदेव्रोक्ति
येनावीतरप्रकरणी स्यात् तस्मात्सर्वार्थतास्यात् ॥ ॥ शेषस्तु गुणसंयुक्तः साधारणः
प्रतीयेत मिथस्तेषाम संबंधात् ॥ ॥ दर्शपूर्णमासयोराग्नेयाग्नीषोमीयैन्द्राग्नाः पुरोडा
शाः तत्राग्नेयं चतुर्द्धा करोतीति चतुर्द्धाकरणं किं सर्वेषां नवत्याग्नेयस्यैव भवेतेति विचारः
तत्र । अग्नेः संबंधमात्रेण नवल्लद्व्योपलक्षणो संबंधश्चाविशिष्टत्वात् सर्वेषामुपल
क्षणी । अग्निस्तावदत्र चतुर्द्धाकरण विषयद्रव्योपलक्षणमात्रेन स्वयं कार्ययोगी तेन
नासौ यथाश्रुतएव गृहीतव्यो येन देवतात्मकतोनोपलक्षणं स्यात् किंतु यावता विना

ति ४

नशक्नोति द्रव्यं लक्षयितुं तन्मात्रमादर्त्तव्यं। संबंधमात्रेण चासौ शक्नोति तन्मात्रं लक्षयितुं। संबंधश्चाग्नेरग्नीषोमा
येपि विद्यते।। तस्मात्तस्याग्नेयशब्देन लक्षितत्वात्तस्यापि तत्र चतुर्धाकरणं। अथवा देवतात्वमेवास्ति यद्विभाग्यां दीय
ते दीयते एव तदेकस्यापि। यस्मादग्नेरिदमिति संबंधमात्रेपि आग्नेयशब्दो भवत्येव। सर्वत्र अग्निकल्पिभ्यां ढक्व
क्व्य इति स्मरणात्। तस्मात्सर्वत्र चतुर्धाकरणमिति ब्रूमः। केवलाद्देवतावाची तद्धितोग्नेः समुच्चरन्।। नान्य
युक्तादग्निदेवत्यं ज्ञातिपादयितुं क्षमः।। देवताभूतस्ताव(द्)दिग्नागेन शब्दस्तद्धितो नोपादीयते। संभवात्तु तस्य यथाग्ने
येयोपलक्षणत्वं। केवलाग्नेयस्यापि सज्ञावात्। अतो नशब्दानवगते न संबंधमात्रेणोपलक्षणत्वं युक्तं। विनाका
रणेन श्रुतबाधप्रसंगा'दग्नीषोमीयादौ तु समासादुत्पन्नस्तद्धितो द्वयोः सापेक्षयोर्देवतात्वमाह। तेन तत्रान्यसापेक्ष
स्याग्नेर्देवतात्वं न च सापेक्षस्य तद्धिते सामर्थ्यमस्ति। तेनाग्नेयशब्दो न शक्नोत्यग्नीषोमीयादिकमभिधातुं। य
द्यपि च संबंधमात्रप्रवृत्तिरस्ति(?) तद्धितस्तथापि अत्र देवतार्थतैवाश्रयितव्या। लक्षणार्थत्वात्। प्रसिद्धसंबंधेन ल
क्षणं भवति प्रसिद्धश्च विधिवाक्यादवगम्यमानविधिवाक्ये च याग्नेर्देवतासंबंध एव पुरोडाशेनावगतो न संब
धमात्रं तस्माद्देवतात्वमेवोपलक्षणं तच्चाग्नीषोमीयादौ नास्तीत्याग्नेयस्यैव चतुर्धाकरणं। तच्चाग्नीषोमीयादौ ना
स्तीत्याग्नेयस्यैव चतुर्धाकरणं।। यदपि शतपथश्रवणं तं चतुर्धाकृत्वा पुरोडाशं बर्हिषदं करोतीति सामान्यवच

३७

नंतदप्यनेनैव विशेषवचनेनोपसंह्रियत इति तस्यैव चतुर्थीकरणं युक्तं ॥ छ ॥ इति श्रीपार्थसारथिमिश्रविर
चितायां शास्त्रदीपिकायां तृतीयस्याध्यायस्य प्रथमः पादः ॥ ॥ अर्थाभिधानसंयोगान्मंत्रेषु शेषभावः स्यात्तस्मा
दुत्पत्तिसंबंधोऽर्थेन नित्यसंयोगात् ॥ पूर्वपादे श्रुतिविनियोगः प्राधान्येन चिंतितः । अधुना लिंगविनियोगश्चिं
त्यते । विनियोजकत्वं च लिंगस्य मंत्राधिकरणसिद्धं अर्थप्रकाशनेनोपकुर्वतो ह्यभिधानात् तद्विशेषस्त्विदानीं चिं
त्यते । लिंगं सामर्थ्यं तच्च मुख्यमिव गौणं वा कथंचिद्धृश्यते ॥ तदिह संशयः । किं मुख्यस्वार्थमात्रेण विनियोगः किं गौणेनापी
ति कः पुनर्मुख्यः को वा गौणः यः शब्दादेवावगम्यते स मुख्यः । यथाग्निशब्दात् ज्वलनः ॥ बर्हिःशब्दाच्च कुशाः । यस्तु
शब्दाभिहितार्थगुणसंबंधात् तत्सदृशोऽर्थः प्रतीयते स गौणः ॥ यथाग्निशब्दान्माणवकः स हि ज्वलनगुणयोग
योगाद्गम्यते । तथा बर्हिःशब्देन तृणांतरं उलपादि । ननु प्रयोगप्रतीत्यविशेषादुभयत्राभिधावकत्वं कस्मान्न भवति । न
विशेषप्रतीतेः अग्निरिव माणवक इति सादृश्यप्रत्यया हि गुणादेव च प्रयोगप्रतीत्युपपत्तेरनेकार्थत्वं च अन्याय्यं । पर
गुणाः परत्र न संभवतीति चेत् । न । प्रत्यभिज्ञानात् । येऽपि प्रतिजन्मि गुणभेदमातिष्ठंते तेऽपि सामान्यात्मनैकमिच्छं
त्येव । तेनोपपन्नो गौणमुख्यविभाग इति युक्ता चिंता ॥ तत्र । अर्थानां स्मरणार्हत्वान्मंत्राणां वा परिरक्षितः प्रतिप्रधा
नमावृत्तेर्गुणानामुभयार्थता । उभयेषामपि तावदर्थानामनुष्ठेयत्वात्स्मरणमपेक्षितं मंत्राश्चार्थप्रति गुणभूताः १८

समर्थस्योभयत्रापि यथा कथंचित्स्मृतिमात्रात् । साक्षादभिधानस्यापि स्मरणमेव फलं ॥ नाधिकं तत्र गौणसामर्थ्य
स्याप्यविशिष्टं । प्रतिप्रधानं च गुणावृत्तिर्न्याय्या । तस्मादुभयत्र विनियोग इति प्राप्तेऽभिधीयते ॥ गौणे सदपि सामर्थ्यं न
प्रमाणान्तराद्विना । आविर्भवति मुख्ये तु शब्दादेवाविरस्ति ततस्तात्पर्यं चक्षुतो मुख्या गौणार्थपरता पुनः । प्रमाणान्तराद्वि
ज्ञेया तदभावान्न सिध्यति । न ह्यग्निरस्येतावता प्रमाणान्तरमन्तरेण गौणसामर्थ्यात्तात्पर्यं वा कथंचिदपि लौकिकाः प्रतिपद्यन्ते
। मुख्यार्थे तु श्रवणादेव शब्दस्योभयमवगच्छन्ति । न चेह प्रमाणान्तरमस्ति येन मन्त्राणां गौणे सामर्थ्ये तात्पर्यं वाभिव्यज्येत ॥
न चानाविर्भूते सामर्थ्ये तात्पर्ये च शब्दार्थः प्रतीयते । तेन गौणोऽर्थो मन्त्रान्न प्रतीयत एव । कथमप्रतीयमाने विनियोगः स्यात् । मु
ख्यस्त्वर्थः शब्दादेवगम्यत इति युक्तस्तत्र विनियोगः । यस्य तु मुख्योऽर्थः प्रकरणे नास्ति तस्यालके षो । यथा पूषाद्यनुमन्त्रणमन्त्राणां
यस्य तु लोके षोपि न संभवति मन्त्रस्य तस्य जपमात्रेण प्रयोगः । न तु गौणत्वं प्रत्यक्षतोऽप्रमाणकत्वात् । अपि च प्रथमावगतमुख्य
विनियोगेनैव कृतार्थत्वान्मन्त्रस्य न तदृशेन गौणे विनियोगः । अर्थापि गौणाभिधानाद्युपायान्तरेणापि स्मृतिसिद्धेर्नासानभिधि
नं मन्त्रमपेक्षेत ततोऽप्रमाणकस्तत्र विनियोगो मुख्यविनियोगस्तु मन्त्राकांक्षावशाद्भवतीति तत्रैव विनियोगः । वचनात्त्वयथा
र्थमैन्द्री स्यात् । अपवाद आरभ्यते अग्नावभ्यूयते निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इति । तत्र संशयः ।
किमनेन मुख्यस्येन्द्रस्य प्रकाशनं कर्तव्यं । उत गौणस्य गार्हपत्यस्येति । तत्र श्रुत्यधिकरणन्यायान्मुख्यस्येति प्रतीयते विनि
योज्यानुसारेण विनियोगस्तु वर्ण्यते । न खल्विन्द्राभिधानस्य मन्त्रस्याग्निप्रकाशने । शक्तिरस्ति न चारं तोऽशक्येऽर्थे विनियु

विश्वारूपाभिवष्टेशचीमि० । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनां ३

नजौबां

ष्यते। तेनायं गार्हपत्यः स्यादिन्द्रो वयवयोगतः। द्वितीयावा समर्थ्यैर्लिङ्ग्यति गार्हपत्योस्य वोपतिष्ठते इति ॥ तेन मन्त्रानुसा
19 रेण विनियोगार्थवर्णना। इन्द्राक्ति गार्हपत्ये न गौण्या वृत्त्याभिधीयते। मनसा धनसा धनर्म्मार्घि इन्द्र ग्रहपतिर्यतः ॥ यद्वोपतिष्ठ
त इत्यत्रैन्द्री क्रियया उपपद्यते समीपस्थानमासनेपदात्तु मितं वाभिधानं। तत्रैन्द्रमन्त्रकरणकाभिधानेन गार्हपत्यस्य कर्म्मत्वं न
संभवति। तिसमीपस्थानविशेषणं गार्हपत्यं भवति गार्हपत्यमुपस्थाभियन्तीति तस्मान्मुख्य एवा विनियोगार्थं इति प्राप्ते
भिधीयते। अग्नौ वचनसामर्थ्याद्विनियोगः प्रतीयते। न वा स्यैतासमर्थत्वं गौणसामर्थ्यसंभवात्। यत्र मानान्तरं नास्ति तत्र गौ
णेन गम्यते। प्रमाणान्तरसद्भावे गौणः शब्दः प्रवर्त्तते। पूर्वाधिकरणे ह्युक्तं द्रुल्लिते विद्यते तत्र च। विशेष्यस्य वचनं तेन गार्हपत्या
र्थता स्फुटा। अवश्यैकल्पनीयश्चेन्मन्त्रस्य ब्राह्मणस्य वा। गौणत्वं तत्रैव मन्त्रस्य ज्ञातार्थस्य न युज्यते। अज्ञातार्थे विधानै
व गौणत्वमुपपत्तिमत्। न वावयवयोगवृत्त्या [illegible] ग्निवेदनोक्तः॥ ॥ अभिधानक्रियायाश्च प्रधानत्वात्तदन्वयः। गा
र्हपत्यस्य नान्यार्थसमीपस्थितिगामिता। तदिदमस्ति तावद्गार्हपत्ये विनियोग इति स्थिते सति च तस्मिन्नलिङ्गादिप्राथ
ताऽपि भवति नेति। बलाबलाधिकरणे वक्ष्यते। तथाङ्गानमपीति चेत्। दर्शपूर्णमासयोराम्नायते हविष्कृदेहीति
त्रिरवघ्नन्नाह्वयतीति तत्र संशयः। किमयं हविष्कृदेहीति मन्त्रो गौणे वधाते प्रयोक्तव्यः किं मुख्ये हविष्कृदाह्वान इति
तदर्थमिदं निरूप्यते। किमस्मिन्वचनेऽवघ्नन्निति अवघातमुद्दिश्य मन्त्रो विधीयते हविष्कृदेहीत्यवघ्नन्निति। किं वा मन्त्रस्याह्वा
नेन संबन्धो गृह्यते इति श्रुकाललक्षणार्थो हविष्कृदेहीति त्रिराह्वयत्यवघातकाल इति। तत्र। पूर्वाधिकरणन्यायात् [illegible]योयु

कानलक्षणा। मंत्रस्य त्वयथार्थत्वं वचनान्नैव दुष्यति। त्रिरितितार्किकथं। विधीयतेतिचेत्। न। आहावघातोद्देशेन मंत्रस्य
त्रिरभ्यासस्य च विधौ वाक्यभेदात्। पाठप्राप्तानुवादत्वाददोषः। मंत्रसमाम्नायविहितमंत्रं त्रिरभ्यस्तमेव केचिदाम्नन्तीति। आ
रुपिए कृयतिस्थैर्यहीतिशब्दोच्चारणसामान्याद्गौणः तस्मादवघातांगं मंत्र इति प्राप्तमभिधीयते। त्रिरभ्यासानपाठेनानित्यप्राप्ताय
तः क्वचित्। द्विः पठ्यते सकृच्चापि तस्मान्नायमनूद्यते। न पाक्षिकानुवादत्वं नित्यान्वयविरोधतः। तस्मादत्र त्रिरभ्यासो विधा
तव्यस्तथा सति। मंत्रस्य न विधिः शक्यो वाक्यभेदप्रसंगतः आह्वानेन तु मंत्रस्य योगो दृष्टीतिस्तु लक्षणा। नन्वेवमप्याह्वानमनू
द्यत्रिरभ्यासो दृष्टीतिकालस्य विधीयत इति वाक्यभेदः स्यान्नो र्थप्राप्तत्वादवघातकाल एव सदायाद्याह्वानमर्थप्राप्तं अतो
नुवादमात्रमवदृष्टीति। एनुवादत्वादेव च लक्षणापि न दोषः। तत्रापि चाविशिष्टं ब्राह्मणे जघन्य वृत्त्याभ्ययनमाङ्क्रियते गौ
णत्वादपि वचनाच्चैवं जातिवच्छ्रौतो विनियोगः किं लिंगितिकरणाव्याप्तस्य मंत्रस्यावघातस्य च समभिव्याहारात्संबंधमात्रं ग
म्यते। तत्र सति संभवे गांगिभावः स्यात् स तु वाक्यभेदात्मंत्रलिंगविरोधाच्च न संभवतीति एककालत्वेव संबंध इति गम्य
ते। नरवः वेहीति परप्रेषणरूपस्य मध्यमपुरुषस्य हविष्कृदिति च संबोधनरूपस्याचेतनेवघाते सामर्थ्यमस्तीत्यस्मात्त्रि
रावृत्तिमात्रविधानादाह्वानांगं मंत्रो नायथार्थोवघाते। तथा स्थानविसर्जने। ज्योतिष्टोमेश्रूयते। उत्तिष्ठन्नन्वाहाग्नीदग्नी
न्विहरेति। अतिकृत्य तातवाचं विसृजेतीति। तत्रापि पूर्ववत्संशयपूर्वोत्तरपक्षाः। वाक्यभेदस्तु दृष्टांगांगित्वपक्षेपि नास्ती
ति तदेवयुक्तमिति विशेषाशंका। श्रुतिविनियोगाभावात्तु मंत्रलिंगविरोधात् अत्रापि कालार्थ एव संयोगः कालश्चेदु

विधीयते न पूर्ववदनूद्यत इति विशेषः ॥ ॥ सूक्तवाके च कालविधिः परार्थत्वात् ॥ दर्शपूर्णमासयोराम्नायते सूक्तवाकेन
प्रस्तरं प्रहरतीति । तत्र संशयः किं प्रस्तरप्रकरणस्य सूक्तवाकस्य च कालार्थः संयोगोऽथवांगांगिभाव इति । तत्र द्वयोः कृता
र्थत्वान्नांगांगित्वं प्रकल्प्यते । कालार्थस्तेन संयोगस्तया दर्शादिवद्भवेत् । यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्युभये
ः कृतार्थत्वात् कालार्थः संयोगः । न चात्रापि सूक्तवाकस्य इष्टदेवताभिधानेन कृतार्थत्वात् प्रकरणं च नानाकर्मोपयुक्तं भेला
र प्रतिपादनेन प्रयोजनवत्त्वात् अंगांगित्वापेक्षाभावात् कालार्थः संयोगः तत्राप्यनिजातिकाले तु सूक्तवाकं प्रस्तर
प्रकरणस्य कालं लक्षयतीति तत्तया च इत्थंभूतलक्षणे तृतीया भविष्यति । न हि कथंचिदपि देवताभिधायिनः सूक्तवा
कस्य प्रकरणांगता भविष्यति प्रकरणे देवताभावात् अतः कालार्थ एव संयोगः एवं प्राप्ते ब्रूमः मुख्या प्रकरणां
गत्वं सूक्तवाकस्य गम्यते तेन त

देवतायोगादेष होमो भविष्यतीत्युक्ते तीर्थाभ्युत्या सूक्तवाकस्य करणत्वं गम्यमानं न यथामुक्त
ष्टं । न चेत्थं श्रुतलक्षणोक्ततीयेयं कारकविभक्तेर्बलीयस्त्वात् लिङ्गवाक्यस्य सर्वैर्हि संबंधः क्रियागर्भ
एव । तेन सूक्तवाकप्रहरणयोर्लक्षणक्रियागर्भोऽयं संबंधो न क्वेह लक्षणक्रिया । पात्रानामनुपात्तामपे
क्षास्यायं संबंधः प्रत्येतव्य इति विप्रकृष्यते । क्रियाकारकसंबंधस्तु नान्यापेक्ष इति बलीयस्त्वं ते
न करणमेव सूक्तवाकः । यद्यपि इष्टदेवताप्रकाशनेनार्थोऽस्ति नार्थः तथापि विनियुज्यते वचनात्
किं हि वचनं न कुर्यात् । न ह्येवं तु दैवतादिध्यायिनः प्रहरणांगता श्रुतिविनियुक्तमंत्रांगत्वात् बला
देव तदभिधेयाभिरिष्टदेवताभिः संयोगः प्रहरणस्य कल्प्यते तेनायं प्रहरति इष्टदेवतासंस्का
रार्थो होमो भविष्यतीति तेनोपपत्त्या इष्टदेवताप्रकाशनं कुर्वता सूक्तवाकस्य प्रहरणं गम्यम् ॥
ऽत्रोपदेशो दृष्टव्यः सर्वेषु वचनेषु ॥ प्रहरणांगं सूक्तवाक इति स्थितं । इदानीमिदं संदिह्यते
किं कृत्स्नः सूक्तवाकः पौर्णमास्याममावास्यायां च प्रयोक्तव्यः उत यथादेवतानुरोधेन विभज्य
प्रयोग इति तत्र सूक्तवाकशब्दस्य समस्तानुवाकवचनत्वेनाम्नानात् प्रसिद्धेराग्नेयादि ना

वचनानां प्रसमप्रपन्नोत्वादि रूपेणामेवकथं नैयायिके प्रकरणावस्थादेकैकस्य कर्मणः सकल
सूक्तवाकांगं प्रयाजादिवत्सैव सकृदेककालवर्तिनां च यागानां तंत्रेण प्रयाजादिवदुपकारोऽस्तीति
न भेदेन प्रयोक्ष्यते। समुदायद्वये तु कालभेदात्सकलत्वे वा दृष्टसाधनविशिष्टदेवता
प्रकाशनार्थोऽयं मंत्रः प्रहरणमपीष्टदेवतासंस्कारार्थमित्युक्तं। तत्रामावास्यादेवताप
दानि पौर्णमास्यां न प्रयोगार्हाणि प्रयोजनाभावादिति प्राप्ते ब्रूमः पौर्णमास्यां विनियोगरूपवचनाद्विनेति नैव २
वचनादि सकलप्रयोगो गम्यते तत्राविद्यमानार्थस्यैव प्रहरणार्थप्रयोक्तव्यं तेन वचनादितिदु
२९ क्तं। विनत्यप्रयोगः प्रयोजनवत्त्वादित्युक्तो हेतुः। नहीन्द्राग्न्यादिशब्दानां पौर्णमास्यां प्रयो २९
जनं। नाग्नीषोमादिशब्दानां मितार्थस्य प्रयोजनम्। यत्तु वचनादित्युक्तं। तत्र सूक्तवाकशब्द
स्यावयवव्युत्पत्त्या इष्टदेवताप्रकाशनमंत्रवचनत्वात्सूक्तं वक्तीति सूक्तवाकः तेन यस्मिन् प्र
प्रयोगे यावत्यो देवताः इष्टाः प्रकाशाय द्योतिता प्राप्नुयुस्तावदेव तत्र तावद्देवतापदप्रयो
गो देवसंपूर्णः सूक्तवाकः। नदति रिक्तानिष्टदेवतापदप्रयोगप्रत्युत सूक्तवाकत्वं हिंसाद्युक्त
वाक एव स्यात्। तस्मादिष्टदेवतानुरोधेन निष्कर्षः॥ ॥ लिंगक्रमसमाख्यानात्काम्ययुक्तं समा

पियहानिँ ७

म्नानम्॥ ॥ऐंद्राग्नमेकादशकपालं निर्वपेदित्यत्रैंद्राग्न्यादिलिंगादुपांशुः समाम्नाता
स्तेनैव लिंगक्रमेण काम्ययाज्यानुवाक्याकांडमित्येवं समाख्यातमंत्रकांडे समाम्नातं इंद्राग्नी
रोचना दिव इत्यादि तदिह मंत्रकांडे संदेहः किं यच यत्र सामर्थ्यमस्ति तत्र तत्र सर्वत्र विनियो
क्तव्याः मंत्राः क्रमसमाख्ये बाधित्वा उत तदृष्टेन काम्येष्टिष्वेति। तदर्थं वा किं लिंगमपि श्रुत्या
दिवन्निरपेक्षमेव विनियोजकं उत तु संबंधबोधकप्रमाणमन्यदप्यपेक्ष्य व्यापारविशेष
मात्रे लिंगस्य प्रामाण्यमिति। तत्रा लिंगस्याप्यनपेक्षस्य मंत्रस्य तेषु विनियोक्तृता मा। तद्बलीयः क्रमा
ख्याभ्यामिति सर्वार्थं तावदेतत्। स्वाध्यायविध्यध्यापितस्य सर्वस्य तावन्मंत्रस्य प्रयोजनेन भवि
तव्यम्। तत्र मंत्रस्वरूपमेव दृष्टार्थस्य प्रकाशकोयं अतो विनियोक्तृत्वमित्युच्यते एवं लिंगः
प्रयोजनस्य प्रकाशनसमर्थं वदिति तद्द्वारेण तत्संबंधि कर्मापूर्वार्थं तदपि तत एव गम्यते किं
मंत्रप्रमाणांतरेण। तच्च क्रमसमाख्याभ्यां प्रबलमिति। बाधेन लिंगात्सर्वार्थमिति। प्राप्ते ब्रू
मः। सत्यं प्रयोजनापेक्षा मंत्रस्यास्ति तथापि नेव सामर्थ्यमात्रेण विनियोगोस्य संभावेन
स्यपेक्षितमपि प्रयोजनं प्रमाणमंतरेण ज्ञातुं शक्यं न वा सामर्थ्यमात्रेण प्रयोजनं किंचित्

इतिबुद्धिरे ५

बोधक

प्र

समर्पकीभूतगव्यादिस्वरूपंमात्र प्रतिपादितं सामर्थ्यादवगम्यते। नत्र तावन्मात्र प्रकाशनैक
लमस्ति कर्म्मणः सर्वसाधनरूपत्वात् ज्ञानार्थतानुत्कर्मसंबंधप्रमाणमन्यदंतरेण साम
र्थ्यमात्रान्निश्चयति रूपाप्रदिष्टभाग इत्यतनुभागराष्ट्रस्य त्यागवचनवात केतुसंबंधसिद्धि
रिति वक्ष्यामः। नचाग्निसूर्यादीनांस्तुवादिवत्क्रतव्यभिचारोपेनानुपस्थापेत लोकोपि
मात्रज्ञावादिंद्रादीनामपि मंत्रार्थवादेतिहासादिभिः कर्मतोन्यत्रापि प्रतीतेः। तस्मात् केतुसंबं
धे प्रमाणमन्यदपेक्षितव्यं। नचमंत्रकांडस्य कर्मसमाख्या। यामन्यत्प्रमाणमस्ति तेन काम्ये
(तु)श्चेयेति तत्रैव विनियोगो न कर्मांतरेषु। नच कर्मांतरेषु समारकापेक्ष्येषां तत्र विनियोगः। ते
२२ षामुपायांतरेणापि स्मृतिसिद्धेरेकांततो मंत्रानप्रकरणत्व। यत्र ह्येकांततस्तत्रैव त्येव सामर्थ्य
मात्रादपि तादर्थ्यद्योतयथार्थमौस्यानुष्ठानांगत्वेन हि तद्विनाऽनुष्ठानं सिध्यति। यथा वास्म २२
ज्ञानस्य सांपरायिककर्मानुष्ठानोपयिकत्वं इहलौकिकोनावोच्ये कर्मांतरेषु विनियोगः। क्रम
समाख्याबलानुकाम्येष्टिष्वेव यथाक्रमं यथासमाख्यं च याज्यानुवाक्यत्वेन विनियोगः। सं
त्रांतो मसंज्ञकत्वामपितास्य प्रसामिधेन्यादौ क्रमसहितेन लिंगेन विनियोगः॥ ॥अधिकारेषु मं

ज्ञान

त्र विधिरैंदार्य्येषु शिष्टात् ॥ ॥ज्योतिष्टोमे काश्चिदाग्नेय्यो ऽग्न आयाहि वीतय इत्या
दयो विशेषरूपेणासंयुक्ताः पठितास्तोत्रादौ च वाक्यान्तरेण विनियुक्ताः प्रदेशान्तरे चाग्नेय्याग्नीध्र
मुपतिष्ठत इति श्रुतं तत्र विचारः किं प्रकृताभिरप्रकृताभिर्वाग्नेयीभिरिदमुपस्थानं कर्तव्यं उत प्र
कृताभिरेवेति। तत्राग्नेयीतिनाशेन सर्वासामभिधानतः। अविशेषेण काचिद्विप्रकृता ग्रह
णप्रमाणं प्रकरणाद्विशेषो वा गम्यत इति चेत्। न प्रकरणस्याविशेषकत्वात् यदि साग्नेयी संस्कारार्थमि
दमुपस्थानं स्यात्तदा तदर्थीसंबंधिनः संस्कारायोगात् तत्साधनत्वेनाः प्रकृताग्न्येवरेच्च उपादीयते
विहाग्नेयी तृतीयानिर्देशात् तत्रशाब्दी मात्रस्यैवांगत्वोपपत्तेः न प्रकरणनियमः सन्निधानादिति
चेत्। तदपि वाक्यप्रदेशान्तरे हि वेदान्तरादौ स्तोत्रादावाग्नेय्यो विहिताः नतूपस्थाने विधौ कस्या
श्चिदाग्नेय्याः सन्निधिरस्ति यत्तस्ता द्विषयोपमाग्नेयीशब्दस्यार्थस्तु वा सन्निधानं तथापि स्तोत्रादि
दिकार्यान्तरार्थत्वात् निराकांक्षत्वान्नात्र संबंधुमर्हति। न चान्यार्थेन सन्निहितेनान्येन्यो विशिष्यते य ८
था अश्वेन गच्छतीत्यश्वेनेन पटेन प्राहतेति पटसंबंधेन निराकांक्षेतासंनिहितेनापि श्वेतम
श्वेनान्यो न विशिष्यते तथेहापि न वाग्नेयीशब्दस्यास्ति विशेषापेक्षा यथाश्रुतस्याग्नेयीशब्द

स्याच्छत्रमात्रस्य यथाकथंचित् समवायोपपत्तेः। तेनोभयोर्निराकांक्षता सत्यपि सन्निधौ न मिथः संबं
धः। अपेक्षितः सन्निधिर्हि संबंधकारणं न सन्निधिमात्रं एवं सत्यपि यदि विशेष्येत श्रुतिजनितोऽवि
शेषप्रत्ययबाधात् श्रुतिरेव बाधिता स्यात्। ननु यौगिकेवाग्नेयीत्वाद्ः सन्निहितामेव व्यक्ति
मवलंबते नैवमवयवार्थसमन्वितत्वलिङ्गमात्रवचनायौगिकान सन्निहितवचनाः प्रमाणान्त
रेण तु विशेष्यमाणास्तत्रैव व्याप्रियन्ते यथा वैश्वदेव्यामिक्षेति तद्धितः सन्निहिता तामामिक्षां प्रत्या
निधत्ते। न चात्र विशेषकमस्ति सतोऽपि सन्निधेरन्याय्येनाविशेषकत्वान्न चात्र सोमस्येवं द्रव्याय
२२ यस्यामनुवादेनाग्नेयीत्वं विधीयते येनानुवादस्य सन्निहितगामित्वात् संनिहितास्वेव प्रतीयेरन्नुग्रा
